No. ४६८६

Title नारदीयपुराणे कोकिलाव्रतोद्यापनम्

Author ×

Extent २० पत्राणि Age सं० १७४९

Subject पुराणमाहात्म्यादि

कोकिलाव्रतोद्यापनम् नारदीयपुराणे

५६८६

५६८६

F. 10

x कोकिमाव्रतं॥ इदं पुस्तकं दवेशंकर x

श्रीगणेशाय नमः। श्रीलक्ष्मीनृसिंहाभ्यां नमः॥ युधिष्ठिर उवाच॥ स्वमत्रोसह संबंधः स्नेहः सौ
१ भाग्यमेव च। मवैधव्या कुलस्त्रीणां तद्व्रतं ब्रूहि केशव॥ श्रीकृष्ण उवाच॥ यमुनायांतटे रम्ये मथुरा
नगरी शुभा। तस्यां शत्रुघ्ननामाभूद्राजा राघवनंदनः। तस्य भार्या कीर्त्तिमाला नाम्नासीद्व्रतया
भुवि। प्रणम्य भगवान्दृष्टो वसिष्ठो मुनिसत्तमः। कीर्त्तिमालोवाच॥ वद मे त्वं मुनिश्रेष्ठ सौभा
ग्यप्राप्तिदं व्रतं। स्त्रियः कथं च भगवांछिवः केन व्रतेन च। वसिष्ठ उवाच॥ यदि पृच्छसि मे त्वं हि व्र
तानामुत्तमं व्रतं। तारणं सर्वपापानां कथयामि निबोधत। दक्षप्रजायते यज्ञे पुरा देवाः समा
गताः। ऋषयश्च तथा सर्वे विद्याधरगणास्तथा। ब्रह्मा विष्णुश्च वायुश्च देवराजस्तथैव च। व १

रुद्रोग्निर्ग्रहाः सर्वे ये चान्ये चादिवौकसः। वसिष्ठो वाल्मिको गार्ग्यो विश्वामित्रो महान्ऋषिः। एते चा
न्ये च ऋषयः सर्वे यज्ञार्थमागताः। अपश्यन्नारदस्तत्र संतिके आगताइति। ईश्वरेण विना सम्य
न्दृष्ट्वा सर्वान्समागतान्। शिखां संस्पृश्य पाणिभ्यां नन्नर्त्त कलहप्रियः। सो लोकलहमूलं च ततः
कैलासमाययौ सर्वौघनाशनं स्थानं कैलासंशिखरं शुभं। तत्र दृष्ट्वा समासीनं गौरीसहितशं
करं। कृतांजलिपुटो भूत्वा प्रणिपत्य मुनिः स्थितः। ईश्वरस्तमुवाचाथ मुनिःश्च संतमनेकधा। किमा
गमनकृत्यं ते मदीयसदनं प्रति। श्वासोच्छ्वासेन संयुक्तस्तन्मे ब्रूहि द्विजोत्तम। ईश्वरस्य वचः श्रु
त्वा शिखां संस्पृश्य पाणिना। दुःखयुक्त इवोवाच नारदः कलहप्रियः। नारद उवाच॥ यन्निमि

त्तमहद्देवमर्त्यलोकात्समागतः। त्वदंतिकं दुःखयुक्तस्तु ह्युपजगत्पते। दक्षयज्ञमहं द्रष्टुं मघ
देवात्समागतः। तत्रयज्ञे स्थिताः सर्वे दक्षजामातरः प्रभो। दृष्टास्त्वं च न तत्र मध्ये दृष्टस्त्रिभुवने
श्वर। तवावज्ञाकृता तेन दक्षेण पापुण्यकर्मणा। तेनानिःश्वाससंयुक्त आगतोस्मि त्वदंतिकं। ईश्वरे
णविनाकिंचित्कर्म कार्यं नसिध्यति। अतोस्य विफलः सर्वः प्रयासो तद्दृश्यतत् भाषितं त्वा नत तद्वचः श्रु
2 न्मिथ्येति चिंतया त्रास क्रोधसक्त तदाजात ईश्वरो जगदीश्वरः। गौर्या च प्रार्थितो देवः श्रुत्वा
तन्नारदेरितां जगदीशं नमस्कृत्य ब्रज्याम्यपितृवेश्मनि। नारदेनाथ सहिता गणेशेन च संयुता।
यज्ञार्थमागता चैव दक्षद्वारे शिवप्रिया। वज्ञो दृष्ट्वा वसोर्ध्वारां लज्जिता च शिवप्रिया। तिष्ठंती द्वा २

रितांदक्षोनददर्शमहासतीं।क्षणमेकंचतिष्ठंतीयदादक्षोनपश्यति।तदैवंचिंतितंगौर्याजीवितव्यं
मयाकथं।न्याविताकुंडनिकदेहाहाहत्वासातनः।क्षिप्तंवन्हौतदागौर्याशापंदत्वासुदारुणं।दृष्ट्वात
द्वैगणेशेनपर्शःपरशुरुधतः।क्षुब्धोह्यसोनदह्यर्थंगौर्याअर्थेगणाधिपः।पाशेनबध्वाकतिचित्को
पान्निहतवान्नसुरान्।दक्षेणनोदितादेवाःसर्वेयुद्धायनिर्ययुः।महद्युद्धमभूत्तत्रसहदेवैर्गणेशितुः।
तद्दृष्ट्वानारदःशीघ्रंपुनःकैलासमाययौ।निवेदयामासवृत्तमुदंतंसर्वमीश्वरे।तच्छ्रुत्वास्फालया
मासजटांकोपादुमापतिः।ततोजातोतिविकटःपुरुषोरक्तलोचनः।सबभाषेमहादेवंनामास्मा
नापदेहिमे।वीरभद्रेतिनामास्यकृत्वाचाज्ञापय[illegible]नुः।दक्षयज्ञविघातार्थंगच्छवीरातिसत्वरं।

श्रुत्वा तदीश्वरवचः सर्वे प्रमथ संवृताः। आययौ यत्र सदनं मस्तग्वद्विषुनिक्षिपन्॥ ततइंद्रादयो देवास्तद्
ध्याय विनिर्ययुः। क्षणात्स्वराजितास्तेन विद्रुताश्च दिशोदश। अनुद्रुतश्च तान्सोपि पूष्णो दंतान्यपात
३ यत्। भगस्य नेत्रे नासां च सरस्वत्या न्यकृंतत्। एवं विद्राव्य तान्सर्वाञ्छिरो दक्षस्य चिच्छिदे। कृत्वै
वं यज्ञघातं स आजगाम शिवांतिकं। नमस्कृत्य पुरस्तस्थौ कृते कार्ये मितिब्रुवन्। तथाप्यशां
तः कोपोस्य ज्ञात्वेति ज्ञानचक्षुषा। प्रसादयितुमीशानं ब्रह्मा विष्णु समीयतुः। नमस्कृत्य स्तुत
स्ताभ्यां प्रसन्नोभूत्सदाशिवः। नारदस्तु बरश्चैव गीतैः शिवमतोषयत्। प्रसन्नो वीक्ष्य तं वि
प्रः शिरवां संस्पृश्य पाणिना। ननर्द नारदस्तत्र नोषयेन्नेधिकं शिवं। एतस्मिन्नंतरे ब्रह्मा
विष्णुश्च प्रमथाधिपं। व्यज्ञिज्ञपत्स्वेदक्षादीन्नूपा दृष्ट्वा विलोकयात्रैत्यांगानक्षेपूर्णांगा ३

न्मृता त्सजीवयज्ञमे। विलोकिता स्तेदेवेनकृष्मादक्ष्याविलोकिताः। तृषादयश्चसरदाअ
भूवं स्तप्तसादतः। उत्थितः पादयोर्मूलं पयोदक्षः पिनाकिनः। अपराधंक्षमस्वेतिपुनःपुन
रुवाचह। उत्थापितः करेणासोऽन्वत्वाद्दक्षः पिनाकिना। उक्तश्च मापुनः कोपडरेवमीशावमान
नं। विचरस्वसुखेनेति भूयस्तं कोपआविशत्। शशापचतदागौरी यज्ञविघ्नकरीशिवः। म
खविघ्नंकृतवती दक्षस्येषा ततोचिरात्। तिर्यग्योनिंसमापन्नाविचरिष्यति भूतले। ततोगौ
रीशाभाषितं प्रणिपत्यसदाशिवं। कथंयास्यामितिर्यक्त्वं भूतले चस्थितिः कथं। अन्यथावनम
विताशापस्रुषत्वयेरितः। कोकिलामधुरालापा भवेयं नंदनेयतः। कोकिलानां स्वररूपंना

४ री रूपं पतिव्रता। विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनां। अविरादेव च पुनः कुले महति जन्म
मोप्नुयात्त्वमेव भर्त्ता च न वियोगश्च मे यतः। वरयेत्कुलजां प्राज्ञः कुरूपामपि कन्यकां। दुःकूले च
समुत्पन्ना भर्त्तुः पातयते कुलं। नदी पातयते कूलं नारी पातयते कुलं। नदीनां चैव नारीणां स्व
च्छंदललिता गतिः। ततस्तुष्टो महादेवश्च क्रेशापविमोचनं। दशवर्षसहस्राणि कोकिलारूपधा श
५ रिणी। नंदने देववविपिने चरिष्यसि ततः परं। हिमाचलसुता भूत्वा मत्प्रियात्वमुपेष्यसि। देवानां
तु यथा विष्णुः सहकारो महीरुहां। गंगा च सर्वतीर्थानां तथा तिर्यक्षु कोकिला। आषाढे द्वे ४
यदास्यातां कोकिलायास्तदार्चनं। तदा या कुरुते नारी न सा वैधव्यमाप्नुयात्। वसिष्ठउवा

च॥ एतद्वाक्यावसाने तु गौरी सा कोकिला भवत्। ततआदिषु विद्धेते प्रथितं कोकिलाव्रतं। या
नारी नैव कुरुते मोहात्सा विधवा भवेत्। कुरुत्वमेतत्कल्याणि कीर्तिमालेव तोत्तमं। कीर्तिमा
लोवाच॥ कथमाराध्यते गौरी कोकिलारूपधारिणी। विधानं ब्रूहि तद्विप्र त्वत्प्रसादात्करो
म्यहं॥ वसिष्ठउवाच॥ कोकिलाव्रतमाहात्म्यं विधानं च वदामि ते। शृणु देवि प्रयत्नेन मंत्रैःपौ
राणिके शुभं। मलमासे त्वतिक्रांते शुद्धाषाढे समागते। आषाढ्यां पौर्णमास्यां तु संध्याका
लेमुपस्थिते। संकल्पयेन्मासमेकं श्रावणिअवधिह्यहं। स्नानं करिष्ये नित्यं च ब्रह्मचर्येसि
तो सिते। भोक्ष्ये नक्तं च भूशय्यां करिष्ये प्राणिनां दयां॥ सौभाग्यधनधान्यादि प्राप्तये

५ शिवतुष्टये। इतिसंकल्प्यविप्रान्नारीविप्रेभ्यएवच। प्राप्यानुसांतुसंपाद्यसामग्रीसकलाम
पि। प्रत्यूषेचप्रतिपदिदंतधावनंसर्वकं। नद्यांगत्वाथवावाप्यंतडागेगिरिनिर्झरे। स्नानंकरोमिदे
वेशिकोकिले प्रीतयेतव। जलेस्मिन्पावनेपुण्येसर्वदेवजलाश्रये। स्नानंकुर्याद्व्रतीदेविसु
गंधामलककैस्तिलैः। दिनाष्टकंततःपश्चात्सर्वौषध्यापुनःपृथक्। वचापिष्टेनचस्नानंदि
नान्यष्टौसमाचरेत्। तिलामलकपिष्टेनवचौषधियुतेनच। षट्दिनानिततःस्नानं
संपूर्णफललिप्सया। स्नात्वाध्यात्वारविंतस्मैदद्यादर्घ्यंप्रयत्नतः। आदित्यभास्कररवेअ
र्कसूर्यदिवाकर। प्रभाकरनमस्तुभ्यंगृहाणार्घ्यंनमोस्तुते। सूर्यार्घ्यमंत्रः। कारयेत्कौ ५

5

किलां देवीं सौवर्णां सर्वकामदां । रौप्य वरत्नयोश्चैव नेत्रयोश्चापि मौक्तिकां । रत्नानि पंचवर्णो
तु चूतवृक्ष समाश्रिता । अथवा तिलपिष्टेन कोकिलां पक्षरूपिणीं । निधाय ताम्रपात्रे तां पूज
येत्सु समाहितः । उपचारैः षोडशभिर्यथावत्तन्निबोधमे । आवाहयामि तां देवीं कोकिलां रूपधा
रिणीं । अवतारं कुरुष्वात्र प्रसादं कुरु सुव्रते ॥ आवाहनं । आगच्छ कोकिले देवि देहि मे खिलवां
छितं । चूतवृक्षं समारुह्य रमसे नंदने वने । आसनं । तिर्यग्योनि समुद्भूते कोकिले कलकंठ
के । तिलपुष्पाक्षतैरर्घ्यं गृहाण त्वं नमोस्तु ते । अर्घ्यं । आषाढस्यासिते पक्षे मेघवर्णस्वरूपि
णि । कोकिला नाम सा देवी स्नानार्थं प्रतिगृह्यतां । स्नानं । कोकिले कलकंठे च माधवे मधु

रस्येरे। वसंते वा ससे सेदेवि वस्त्रार्थं प्रतिगृह्यतां। वस्त्रं। श्रीखंड चंदनं दिव्यं गंधाढ्यं सुमनोहरं। वि
६ लेपनं मया दत्तं प्रीत्यर्थं प्रतिगृह्यतां। गंधमंत्रः। हरिद्राकुंकुमद्रव्यैः कोकिले कामसंभवे। कुं
कुमेनार्चितासि त्वमतः शांतिं प्रयच्छ मे। हरिद्रामंत्रः। कूल्लं शुक्लं चरकं वावासांसि विविधानि
च। पीतसूत्रप्रदानेन प्रीताः स्युः सर्वदेवताः। वस्त्रयुग्मं। माल्यादीनीति पुष्पं। वनस्पत्युद्भव
6 इति धूपं। आज्यं च वर्तिसंयुक्तमिति दीपं। सर्वभक्ष्यसमायुक्तं रसैः सर्वैः समन्वितं। सर्व
देवसमाहारं नैवेद्यं प्रतिगृह्यतां। नैवेद्यं गृह्यतां देवीति नैवेद्यं। कूष्माण्डैर्नालिकेरैश्च
खर्जूरैर्दाडिमैः फलैः। चूतजंबीरजंबूश्रीफलैरामलकैस्तथा। द्राक्षानारंगबदरै

मातुलिंगैः सकर्कटैः। फलानि। पूगीफलमिति। तांबूलं। हिरण्यमिति दक्षिणा। प्रार्थना। भिन्ना
निकंठसूत्राणि दद्यात् ज्ञापितदिनोद्दिने। कुंकुमं पुष्पतांबूलं अक्षताश्च दिनदिने। कुर्यादेवंविधां
पूजां आवल्ग्यं तं च सुव्रते। विसर्जयेच्च पश्चात्तां सौवर्णी कोकिलां यदा। यदा तु तिलपिष्टस्य
कोकिला क्रियते तदा। कुर्यात्तत्र त्वहं माक्षानं भिन्नायाः सा विसर्जनं। रम्यं वनं समागत्य भक्ता
कोकिल कूजितं। यदा न क्रियते शक्त्युं उपवासं तु तद्दिने। कोकिले हेमवर्णे च सदा वासो
वनेषु ते। सौभाग्यमतुलं देहि गृहाणार्घ्यं नमोस्तु ते। विसर्जनमंत्रः। चैत्ररथ्यवनोत्पन्ने
विंध्यापर्वतवासिनि। गच्छ गच्छ महादुर्गे स्वस्थाने नंदने वने। विसर्जनं। रूपं देहि धनं देहि

१ सर्वसौख्यं वदेहिमे।पुत्रान्देहि यशोदेहि सौभाग्यं देहि संपदः। इत्यक्त्वा व्रततः पश्चाद्दवि
ष्यान्नेन सुव्रतां। नक्तभोजी भवेत्पार्थ: यावन्मासः समाप्यते। मासांते ताम्रपात्रेतु कोकिलां
स्वर्णनिर्मितां। वस्त्रधान्य गुडैर्युक्तां ब्राह्मण्यां कुंडलेतथा। दद्यान्सद्दक्षिणां चापि देव
ज्ञे वा पुरोहिते। एवमाषाढ मासस्य द्वे विध्ये समुपस्थिते। सधवा विधवा वापि या नारी को
किला व्रतं। करोति सप्त जन्मानि सौभाग्यं लभते तु सा। मृता गौरीपुरं याति विमाने
नार्क तेजसा॥ श्रीकृष्ण उवाच॥ एतद्व्रतं वसिष्ठेन मुनिना कथितं पुरा। तथाकृतं च तत्पार्थ सम १
स्तं कीर्त्तिमालया। तस्याश्च सर्वं निष्पन्नं वसिष्ठ वचनं यथा। १००॥ एवं न्या पि कोंतेय कोकिला

या

धैतमुत्तमं।करिष्यतिततस्तस्याःसौभाग्यंचभविष्यति।आषाढौद्वौयदास्यातांकोकिलाव्रतमा
चरेत्।नकरोतियदानारीव्याघ्रीभवतिकानने।एकतःसर्वदानानिकोकिलाव्रमेकतः।कृतंपु
राघ्नरोभिश्चऋषिपत्नीभिरादरात्।अहल्ययाचसास्नात्वार्चिताशापविमुक्तये।अरुंधत्याच
सास्नात्वापूजिताकोकिलान्यपासीत्तयापूजितासापिसर्वकामार्थसिद्धये।गौतम्यादंडकार
ण्यस्नानंकृत्वायथाविधि।नलान्वेषणकामायदमयंत्याचपूजिता।रुक्मिण्याचततःस्नात्वा
पूजिताकोकिलाशिवा।विष्णोःपत्यकरत्वाप्त्यर्थंतच्चजातंनसंशयः।कुचैलामलिनादीनापरक
मीरतातथा।एवंवंध्याकाकवंध्याविवत्स[illegible]तवत्सका।सर्वास्ताःफलमाप्नुःसुव्रतस्यास्य

८ प्रभावतः। आयुरारोग्यमैश्वर्यं सुखं वृद्धिर्यशः प्रजां। सौभाग्यं सुंदरं रूपं नारी प्राप्नोति नान्यथा। एतद्व्रतं
मयाख्यातं कार्यं वारात्रयं नृप। तृतीयां तेन विधिवत्कार्यमुद्यापनं शुभं। एकस्याः क्रीयते द्रव्यं द्वितीया
लौ धनमते सुतान्। तृतीया चापि सौभाग्यं प्राप्नुयान्नात्र संशयः। इति वाराहपुराणे कोकिलाव्रतं संपू
र्णं।। अथोद्यापनं।। उद्यापनव्रतं ब्रूहि व्रतस्यास्य मम प्रभो। येन विज्ञानमात्रेण सौभाग्यं च भविष्यति।
श्रावण्यां पौर्णमास्यां तु शुक्लपक्षा विशेषतः। द्वितीयामेकभक्तं च दंतधावनपूर्वकं। उपवासस्य
8 नियमं कर्तुं व्रतपरायणा। तृतीया पुण्यफलदा मध्याह्ने समुपोषिता। उपलिप्य शुचौ देशे मं
डलं तत्र कारयेत्। पंकजं वर्त्तिरेखस्य शुभ्रं मद्ध्ये चतुष्कोणयोः। कलशं वा स्थिपूर्णं च पंचरत्नसम ८

न्वितं। तस्योपरिन्यसेत्पात्रं भूर्पवं धैकविंशतिः। सप्तधान्यमृतं पात्रं प्रस्थैनैके नपूरयेत्। तदभा
वे तदर्द्धं वा कुटंबेनाथ नारद। दुर्गां पद्मं स्तुल्लवर्णं युग्मं दद्याच्च शक्तितः। तस्योपरिन्यसेद्देवीं कोकि
लां पूर्ववत्तदा। अत्र गंधप्रदानेन धूपदीपप्रदानकं। नैवेद्यं मोदकाद्यं च पक्वान्नं सघृतं बहु।
अर्घ्यं चैव प्रदातव्यं तांबूलं फलमुत्तमं। रात्रौ जागरणं कार्यं वाद्यनृत्यप्रभृतिकं। भक्तिमा
एकचित्तेन फलं प्राप्नोति चाक्षयं। प्रभाते विमले जाते स्नानं कृत्वा विधानतः। पूजयेद्विधि
वद्देवीं होमं च विधिवद्द्विजः। तिलं चंपककुसुमैश्च तंदुलै घृतपायसैः। अष्टोत्तरशतं हुत्वा
दुर्गामंत्रेण वैदिकैः। कोकिलाप्रीतये ब्रह्मन् व्याहृतीनां शतत्रयं। ब्राह्मणान्भोजयेत्पश्चात्

कुंभां　　　　न२　　कुंडलौ ४　　न२　　य

६ सपत्नीकांश्चवयं च च। अशक्तो ह्येकयुग्मं च भोजयेच्च तथा गुरुं। त्रिस्त्रीभ्यश्च प्रदातव्या कार्यका
धं च मेव च। सोदकांश्च स[illegible]ंश्च वंशपात्रसमन्विता। कृष्णवर्णसमायुक्ता पक्वान्नं च प्र
न पूरयेत्। सर्वोपस्करसंयुक्तांस्त्रिस्त्रिभ्यश्च प्रदापयेत्। आचार्यं पूजयेद्भक्त्या गां कृष्णां च स
वत्सकां। उपानहौ तथा शय्यां चामरं छत्रमेव च। मुद्रिकां कुण्डलौ वासो च चंदनं कुसुमानि
प च। सर्वं दद्याद्द्विजेन्द्राय सपत्नीकाय नारद। दापयेद्विधिवत्सर्वं ब्राह्मणाय कुटुंबिने।
व्रतोपदेष्टे दानं च भोजनं च सदक्षिणं। एवमाकुरुते राजन्कोकिलाव्रतमुत्तमं। सर्वं प्रा
प्नोति सौभाग्यं पुत्रपौत्रधनानि च॥ ततो भुंजीत नैवेद्यं पुत्रपौत्रैः समन्वितः। कोकिल ९

पूजितो गच्छ विधिवत्सर्वकामदे। कारयेत्कोकिलां देवीं सौवर्णां च सकामदां। रौप्यं चरणं चंचूनां
३० रचिता नेत्रे मौक्तिकं। पंचरत्नानि पृष्ठे च चूतवृक्षसमाश्रिता॥ एवं त्वं च यथाशक्त्या यथोक्ता च
शनैः शनैः। विप्रकरार्पिता लक्ष्मी सस्वभावमिदं शृणु। महापक्षम वाप्नोति महामाया प्रसाद
तः॥ इति नारदीयपुराणे कोकिलाव्रतोद्यापनं संपूर्णं॥ ॥ श्रीशुभमस्तु॥ ॥ संव
त् १९७ ४९ श्रावणकृष्णपक्षे चतुर्थ्यां गुरुवासरे कोकिलाव्रतसमाप्तः॥ बाळबोपनामक इदं पु
स्तकं गोपाळभट्टेन लिखितं। द्विवेदिसरवरस्य इदं पुस्तकं। काश्यां लिखित्वा दत्तं॥ लक्ष्मीनसिं
हाभ्यां नमः॥ ओं भवानीशंकराभ्यां नमः॥ ॥ काळभैरवाय नमः॥ मणिकर्णिकायी नमः॥ ३०

॥ कोकिलाव्रतं ॥ इदं पुस्तकं देवशंकर ॥

एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकाः।प्रीयतां
धर्मराजस्यदानेनानेनसर्वदा॥१॥
तस्यप्रदानात्सककममैंसंतुमनोरथाः १